Click here to go back

Rahu Stotra - Devanagari

|| श्री महागणपतये नमः ||
Indian Astrology Source
www.astrovidya.com

# अथ राहु स्तोत्रं

राहुर्दानवमन्त्री च सिंहिकाचित्तनन्दनः। अर्धकायः सदा क्रोधी चन्द्रादित्यविमर्दनः॥ रुद्रो रुद्रप्रियो दैत्यः स्वर्भानुर्भानुभीतिदः। ग्रहराजः सुधापाणी राक्षस आतिथ्यभिलाषकः॥ कालदृष्टिः कालरूपः श्रीकण्ठहृदयाश्रयः। विधुन्तुदः सैंहिकेयो घोररूपो महाबलः॥ ग्रहपीडाहरो दंष्ट्री रक्तनेत्रो महोदरः। पञ्चविंशतिनामानि स्मृत्वा राहुं सदा नरः॥ यः पठेन्महती पीडा तस्य नश्यति केवलम्। आरोग्यं पुत्रमतुलां श्रियं धान्यं पशूंस्तथा॥ ददाति राहुस्तस्मै यः पठते स्तोत्रमुत्तमम्। सततं पठते यस्तु जीवेद्वर्षशतं नरः ॥ इति श्रीस्कान्दपुराणे राहुस्तोत्रं॥

**Please consider the environment -**

**do not print unless essential**

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com

Click here to go back